मादौ प्रोक्तवानिति” गीता । शिल्पशास्त्रविषयके ज्ञाने च “मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः” अमरः। ज्ञानमात्रे क्षणिकविज्ञानमिति बौद्धाः ।

सम्+सम्यग् ज्ञाने संज्ञायां चैतन्ये च आत्म०। संजानानान् परिहरन् रावणानुचरान् बहून्” भट्टिः । “रविस्तु संज्ञापयते लोकान् रश्मिभिरुल्वणैः” भा० शा०७१२७६७ । प्रतिज्ञायाम् आत्म०। “संजानीष्व क्षमीशा” च मुग्ध-बोधम् । [ अजिज्ञपत् त ।

**ज्ञा** ज्ञपधात्वर्थे चुरा० उभ० सक० सेट् घटा० । ज्ञपयति ते

**ज्ञा** प्रेरणे चुरा०उभ०सक०सेट् । ज्ञापयति ते अजिज्ञपत् त। अस्यैव रूपम् आज्ञापयतीत्यादि। “आज्ञापय ज्ञात-विशेष ! पुंसाम्” कुमा०।

**ज्ञात** त्रि० ज्ञा—कर्म्मणि क्त । विदिते “ज्ञाततत्त्वोऽपि “खल्वेकः सन्दिग्धे कार्य्यवस्तुनि” माघः । ‘ज्ञाता-ज्ञाताः कुले मम”वायुपु०। भावे क्त । २ज्ञाने न०। यावा० स्वार्थे कन् । ज्ञातक विदितार्थे । [ अर्हद्भेदे हेम० ।

**ज्ञातनन्दन** पु० ज्ञातेन ज्ञानेन नन्दति नन्द—ल्यु ३त० ।

**ज्ञातल** त्रि० ज्ञातं ज्ञानं लाति ला—क । ज्ञानयुक्ते तस्या-पत्यं शुभ्रा०शतलेत्यत्र ज्ञातलेति पाठान्तरात् ढक् । ज्ञातलेय तदपत्ये पुंस्त्री० । [ नत्रे अमरः ।

**ज्ञातसिद्धान्त** पु० ज्ञातः सिद्धान्तः तत्त्वार्थो येन । सिद्धा-

**ज्ञाति** पु० जानाति छिद्रं कुलस्थितिं वा संज्ञायां क्तिच् । ज्ञा—कर्त्तरि करणे वा क्तिच् । १पितरि २पितृवंश्ये सपिण्डसकुल्यसमानोदकसगोत्रजरूपे एकगोत्रोत्पन्ने पितृव्यादौ अमरः।“ज्ञातिभेदो न नः कार्य्यः साक्षी त्वं मम नारद !”हरिवं०१२८अ०। ज्ञातिश्च चतुर्विधः“सप्तमपुरुषपर्य्यन्तं सपिण्डः। ततस्त्रिपुरुषपर्य्यन्तं सकुल्यः। ततश्चतुर्थपुरुषपर्य्यन्तं समानोदकः। जन्मनामस्मृतिपर्य्यन्तमपि समानोदकः। ततः परं सगोत्रजः। ज्ञातिद्रोहे दोषो यथा “यानि कानि च पापानि ब्रह्महत्यादिकानि च । ज्ञातिद्रोहस्य पापस्य कलां नार्हन्ति षोडशीम् । “भर्तृभ्रातृपितृज्ञातिश्वश्रूश्वशुरदेवरैः” । “ज्ञातिश्रैष्ठ्यं सर्वकामानाप्नोति श्राद्धदः सदा” इति च याज्ञ० । “ज्ञातिभ्यो द्रविणं दत्त्वा कन्यायै चैव शक्तितः” मनुः । ततः परस्य पुत्रयज्ञस्य समासे नाद्युदात्तता ।

**ज्ञातृ** त्रि० ज्ञा—तृच् । १ज्ञानशीले २वेत्तरि च ज्ञातृभावः अण् । ज्ञात्र ज्ञातृत्वे न० “संविच्च मे ज्ञात्रं च मे” यजु० ८.७। ‘ज्ञात्रं विज्ञानसामर्थ्यम्” वेददी० ।

**ज्ञातेय** न०ज्ञातेर्भावः कर्म वा ढक् ।१ज्ञातित्वे २ज्ञातिकर्म्मणि च । “ज्ञातेयं कुरु सौमित्रे ! भयात्त्रायस्व राघवम्”भट्टिः

**ज्ञान** पु० विषयान् जानाति ज्ञः अनिति अनः कर्म्म०। १जीवे । भावे ल्युट् । २बोधे न० । ३विशेषेण सामान्येन चाववोधे । वेदान्तिमते ४पदार्थग्राहिकायां मनोवृत्तौ, तच्च ज्ञानं नानाविधं यथा ज्ञानं द्विधा वस्तुमात्रद्योतकं निर्विकल्पकम् । सविकल्पन्तु संज्ञादिद्योतकत्वादनेकधा । संकल्पसंशयभ्रान्तिस्मृतिसादृश्यनिश्चयाः । ऊहोऽनध्यवसायश्च तथान्येऽनुभवा अपि” । इत्यादिभेदैर्नानेकविधा भवन्तीत्यर्थः । ५सम्यग्बोधे । न्यायमते ६ बुद्धिमात्रे “बुद्धिस्तु द्विविधा मता । अनुभूतिः स्मृतिश्चैव” भाषा० तच्च प्रकारान्तरेण द्विविधं यथा “अप्रमा च प्रमा चेति ज्ञानं द्विविधमुच्यते, तच्छून्ये तन्मतिर्या स्यादप्रमा सा निरूपिता । तत्प्रपञ्चो विपर्य्यासः संशयोऽपि प्रकीर्त्तितः । आद्यो देह आत्मबुद्धिः शङ्खादौ पीततामतिः । भवेन्निश्चयरूपा सा संशयोऽथ प्रदर्श्यते । किंस्विन्नरो वा स्थाणुर्वेत्यादिबुद्धिस्तु संशयः। तदभावाऽप्रकारा धीस्तत्प्रकारा तु निश्चयः । स संशयो भवेद्या धीरेकत्राभावभावयोः । साधारणादिधर्मस्य ज्ञानं संशयकारणम् । दोषोऽप्रमायाजनकः प्रमायास्तु गुणो भवेत् । पित्तदूरत्वादिरूपो दोषो नानाविधो मतः । प्रत्यक्षे तु विशेषेण विशेषणवता समम् । सन्निकर्षो गुणस्तु स्यादथ त्वनुमितौ गुणः । पक्षे साध्यविशिष्टे च परामर्शो गुणो भवेत् । शक्ये सादृश्यबुद्धिस्तु भवेदुपमितौ गुणः । शाब्दबोधे योग्यतायास्तात्पर्य्यस्याथ वा प्रमा। गुणः स्याद्, भ्रमभिन्नस्तु ज्ञानमत्रोच्यते प्रमा । अथ वा तत्प्रकारं यज्ज्ञानं तद्वद्विशेष्यकम् । ज्ञानं यन्निर्विकल्पाख्यं तदतीन्द्रियमिष्यते । तत् प्रमा नाऽप्रमा नापि ज्ञानं यन्निर्विकल्पकम् । प्रकारत्वादिशून्यं हि सम्बन्धानवगाहि तत्” इति भाषा० । ७बुद्धिवृत्तिनिरोधरूपे योगे “एकत्वं बुद्धिमनसोरिन्द्रियाणाञ्च सर्वशः। आत्मनो व्यापिनस्तात ! ज्ञानमेतदनुत्तमम्”इति भा०शा०मोक्षधर्मः। एकत्वं बुद्धिमात्रेणावस्थानम् बुद्धिवृत्तिनिरोध इति यावत् । ८देवताध्यानादौ ९विवेकविज्ञाने शास्त्राचार्य्योपदेशजे परमात्मविषये साक्षान्मोक्षफले १०आत्मनिश्चये तत्त्वज्ञाने वेदान्तिमते ११जीवेश्वरजगद्भेदभ्रमाधिष्ठानभूते नित्यस्वप्रकाशे सच्चिदानन्दरूपाद्वितीये परमार्थसत्ये, चैतन्ये । करणे ल्युट् । १२आत्मानात्मसर्वपदार्थाव-